काथ: क्रत: क्रन्तति कण्ठकुब्जं
कण्ठीरव: कुञ्जरमाशु यद्वत् ॥”
सिंहाननो वासक: । शर्व्वरी हरिद्रा ।
“किरातकट्काकणाकुटजकण्टकारीशटी-
कलिङ्गकिलिमाभयाकटुककट्फलाम्भोधरै: ।
विषामलकपुष्करानलकुलीरशृङ्गीवृषै-
र्म्महौषधसखैरयं जयति कण्ठकुब्जं गण: ॥”
शटी कर्च्चूर: । कलिङ्ग: विभीतक: । किलिमं देवदारु: । कटुकं मरिचम् । विषा अतिविषा । पुष्करं पुष्करमूलम् । वृष: वासक: । वृषादिभि: किंविशिष्टै: महौषधसखै: महौषधस्य सखिभि: । तेन एतै: सहितेन महौषधेन इत्यर्थ: ॥ * ॥ अथोल्वणवातादिप्रहृष्टमध्यक्षीणवातादिहेतुकानां कुम्भीपाकादिसन्निपातज्वराणां त्रयोदशानां चिकित्साभिधीयते सा च तुल्यहेतुकानां विस्फुरकादीनां त्रयोदशानामिव विधातव्या। इति सन्निपातज्वराधिकार: । इति भावप्रकाश: ॥

सन्निपातनुत्, पुं, (सन्निपातं नुदतीति । नुद + क्विप् ।) नेपालनिम्ब: । इति राजनिर्घण्ट: ॥

सन्निबद्ध:,त्रि, सम्यग्बन्धनयुक्त: । संनिपूर्व्वबन्धधातो: कर्म्मणि क्तप्रत्ययेन निष्पन्न: ॥

सन्निबन्धनं, क्ली, सम्यङ्निश्चितबन्धनम् । सम्यग् विबन्धनम् । संनिपूर्व्वकबन्धधातोरनट्प्रत्ययेन निष्पन्नम् ॥

सन्निभ:, त्रि, (सम्यक् निभातीति । सं + नि + भा + क: ।) सदृश: । इति जटाधर: ॥ (यथा, भागवते । ३ । १३ । २२ ।
“भगवान् यज्ञपुरुषो जगर्ज्जागेन्द्रसन्निभ: ॥”)

सन्निरुद्धगुद:,पुं, (संनिरुद्धं गुदं यस्मात् ।) गुह्यद्वारोद्भवरोगविशेष: । इति भावप्रकाश: ॥ (यथा, सुश्रुते । ४ । २० । ४२ ।
“संनिरुद्धगुदं रोगं वल्मीकं वह्निरोहिणीम् ।
प्रत्याख्याय यथायोगं चिकित्सितमथाचरेत् ॥”
तन्निदानादि क्षुद्ररोगशब्दे द्रष्टव्यम् ॥

सन्निविष्ट:, त्रि, (सं + नि + विश् + क्त: ।) उपविष्ट: । यथा, —
“ध्येय: सदा सवितृमण्डलमध्यवर्त्ती
नारायण: सरसिजासनसन्निविष्ट: ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्र: ॥”
इत्यादित्यहृदयम् ॥
निकट: । इति केचित् ॥

सन्निवृत्ति:, स्त्री,(सं + नि + वृ + क्तिन् ।) सम्यङ् निवर्त्तनम् । (यथा, रघु: । १० । २७ ।
“गतिस्त्वं वीतरागाणामभूय: सन्निवृत्तये ॥”)

सन्निवेश:, पुं, (संनिविशन्ते अत्रेति । सं + नि + विश + घञ् ।) पत्तनादिषु दिगादिपरिच्छिन्नप्रदेश: । पूर्व्वदिगाद्यवच्छिन्नस्थानम् । इति अमिङ्क: ॥ पुराद्बहिर्विहरणभूमि: । इति स्वाम्यादय: ॥ तत्पर्य्याय: । निकर्षणम् २ । इत्यमरभरती ॥ किञ्च ।
“नगरादिबहि: स्वैरविहारचारुभूमिषु ।
तत्र इयं निगदितं सन्निवेशो निकर्षणम् ॥”
इति शब्दरत्नावली ॥
(यथा, रघु: । १४ । ७६ ।
अमून्यतीरां मुनिसन्निवेशै-
स्तमोऽपहन्त्रीं तमसां वगाह्य ॥”
संस्थानम् । यथा, कुमारे । ३ । ४५ ।
“उत्तानपानिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये ॥”)

सन्निहितं, त्रि, (सं + नि + धा + क्त: ।) निकटस्थितम् । यथा । ब्रह्मपुराणे ।
“षष्ठ्यादौ कृष्णपक्षे तु भूमौ सन्निहिता भवेत्
यावत् पुष्यममावास्यां दिनानि दश पञ्च च॥”
इति प्रायश्चित्ततत्त्वम् ॥
(अग्निविशेषे, पुं । यथा, महाभारते । ३ । २२० । १८ ।
“प्राणानाश्रित्य यो देहं प्रवर्त्तयति देहिनाम् ।
तस्य सन्निहितो नाम शब्दरूपस्य साधन: ॥”)

सन्न्यस्त:, त्रि, (सं + नि + अस् + क्त: ।) सम्यङ्न्यासीकृत: । समर्पित: । यथा,—
“योगसन्न्यस्तकर्म्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्म्माणि निबध्नन्ति धनञ्जय ॥”
इति भगवद्गीतायाम् ४ अध्याय: ॥

सन्न्यास:, पुं, (सं + नि + अस् + घञ् ।) जटामांसी । इति शब्दचन्द्रिका ॥ काम्यकर्म्मणां न्यास: । यथा,—
“काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदु:
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणा: ॥”
इति श्रीभगवद्गीतायाम् १८ अध्याय: ॥
अपि च ।
“सन्न्यास: कर्म्मणां न्यास: कृतानामकृते: सदा
कुशलाकुशलाभ्यान्तु प्रहाणं न्यास उच्यते ॥”
इति मात्स्ये १२० अध्याय: ॥*॥
चतुर्थाश्रम: । तदाश्रमधर्म्मा यथा,—
“सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यसमन्वित: ।
जितेन्द्रियत्वमावासे नैकस्मिन् वसतिश्चिरम् ॥
अनारम्भस्तथाहारे भिक्षा विप्रे ह्यनिन्दिते ।
आत्मज्ञानविवेकश्च तथा ह्यात्मावबोधनम् ॥
चतुर्थे चाश्रमे धर्म्मा ह्यस्माभिस्ते प्रकीर्त्तिता:॥”
इति वामने १४ अध्याय: ॥*॥
तदाश्रमकालादि यथा,—
“एवं वनाश्रमे स्थित्वा तृतीयं भागमायुष: ।
चतुर्थमायुषो भागं सन्न्यासेन नयेत् क्रमात् ॥
अग्नीनात्मनि संस्थाप्य द्विज: प्रव्रजितो भवेत् ।
योगाभ्यासरत: शान्तो ब्रह्मविद्यापरायण: ॥
यदा मनसि सम्पन्नं वैतृष्ण्यं सर्व्ववस्तुषु ।
तदा सन्न्यासमिच्छेत्तु पतित: स्याद्विपर्य्यये ॥
प्राजापत्यान्निरूप्येष्टिमाग्नेयीमथवा पुन: ।
दान्त: पक्वकषायोऽसौ ब्रह्माश्रमसुपाश्रयेत् ॥”
इति कौर्म्मे उपविभागे २७ अध्याय: ॥*॥
कलौ क्षत्त्रियवैश्ययो: सन्न्यासनिषेधो यथा,—
“अश्वमेधं गवालम्भं सन्न्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्ज्जयेत् ॥”
इति कलौ सन्न्यासनिषेधकं क्षत्त्रियवैश्यविषयकम् इति मलमासतत्त्वम् ॥ सन्न्यासप्रतिषेधश्च कलौ क्षत्त्रविशोर्भवेत् । इति मलमासतत्त्वप्रतिज्ञायां श्रीरघुनन्दनभट्टाचार्य्य: ॥ * ॥
चैत्रमासे सन्न्यासकरणप्रमाणं यथा,—
“चैत्रे शिवोत्सवं कुर्य्यात् नृत्यगीतमहोत्सवै: ।
स्नायात् त्रिसन्ध्यं रात्रौ च हविष्याशी जितेन्द्रिय: ।
शिवस्वरूपतां याति शिवप्रीतिकर: पर: ॥
क्षत्त्रियादिषु यो मर्त्यो देहं संपीड्य भक्तित: ।
अश्वमेधफलं तस्य जायते च पदे पदे ॥
सर्व्वकर्म्मपरित्यागी शिवोत्सवपरायण: ।
भक्तैर्ज्जागरणं कुर्य्याद्रात्रौ नृत्यकुतूहलै: ॥
नानाविधैर्म्महावाद्यैर्नृत्यैश्च विविधैरपि ।
नानावेशधरैर्नृत्यै: प्रीयते शङ्करप्रभु: ॥
किमलभ्यं भगवति प्रसन्ने नीललोहिते ।
तस्मात् सर्व्वप्रयत्नेन तोषणीयो महेश्वर: ॥
शङ्खवाद्यं शङ्खतोयं वर्ज्जयेत शिवसन्निधौ ।
ग्रामाद्बहिरिमं शम्भोरुत्सवं कारयेन्मुदा ।
उपोष्य हुत्वा संक्रान्त्यां व्रतमेतत् समापयेत् ॥”
इति बृहद्धर्म्मपुराणे उत्तरखण्डे ९ अध्याय: ॥

सन्न्यासी, [न्]पुं,(संन्यासोऽस्यास्तीति । इनि: । सन्न्यासाश्रमविशिष्ट: । चतुर्थाश्रमी । तत्पर्य्याय: पाराशरी २ मस्करी ३ परिव्राट् ४ कर्म्मन्दी ५ श्रमण: ६ भिक्षु: ७ । इति जटाधर: ॥ तस्य लक्षणादि यथा । सर्व्वं गृहादिकं त्यक्त्वा मुण्डितमुण्डो गैरिककौपीनाच्छादनं दण्डं कमण्डलुञ्च बिभ्रत् भिक्षावृत्तिर्निर्ज्जने तीर्थे वा स्थित्वा केवलमीश्वराराधनं करोति य: स सन्न्यासी । स तु चतुर्व्विध: । कुटीचर: १ बहूदक: २ हंस: ३ परमहंस: ४ । तस्य धर्म्मा यथा,—
“सदने वा कदने वा लोष्ट्रे वा काञ्चने तथा
समबुद्धिर्यस्य शश्वत् स सन्न्यासीति कीर्त्तित: ॥
दण्डं कमण्डलुं रक्तवस्त्रमात्रञ्च धारयेत् ।
नित्यं प्रवासी नैकत्र स सन्न्यासीति कीर्त्तित:॥
शुद्धाचारद्विजान्नञ्च भुङ्क्ते लोभादिवर्ज्जित: ।
किन्तु किञ्चिन्न याचेत स सन्न्यासीति कीर्त्तित:
न व्यापारी नाश्रमी च सर्व्वकर्म्मविवर्ज्जित: ।
ध्यायेन्नारायणं शश्वत् स सन्न्यासीति कीर्त्तित:
शश्वन्मौनी ब्रह्मचारी सम्भाषालापवर्ज्जित: ।
सर्व्वं ब्रह्ममयं पश्येत् स सन्न्यासीति कीर्त्तित: ॥
सर्व्वं च समबुद्धिश्च हिंसामायाविवर्ज्जित: ।
क्रोधाहङ्काररहित: स सन्न्यासीति कीर्त्तित: ॥
अयाचितोपस्थितञ्च मिष्टामिष्टञ्च भुक्तवान् ।
न याचेत भक्षणार्थी स सन्न्यासीति कीर्त्तित: ॥
न च पश्येत् मुखं स्त्रीणां न तिष्ठेत्तत्समीपत:
दारवीमपि योषाञ्च न स्पृशेद् य: स भिक्षुक: ।
अयं सन्न्यासिनां धर्म्म इत्याह कमलोद्भव: ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३२ अध्याय: ॥*॥
अपि च ।
“सर्व्वन्यासी हरौ भूप धर्म्म: सन्न्यासिनां ध्रुवम्